# vidyAgItA

# વિદ્યાગીતા

## Document Information

Text title : Vidya Gita

File name : vidyaagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Author : Traditional

Transliterated by : sunder hattangadi

Proofread by : sunder hattangadi

Description-comments : Tripura Rahasya, Jnana Khanda, Ch. 20

Latest update : November 7, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# વિદ્યાગીતા

ત્રિપુરા રહસ્યે જ્ઞાનખણ્ડે
અથ વિંશોધ્યાયઃ ।

અત્ર તે વર્તયિષ્યામિ પુરા વૃત્તં શ્રુણુષ્વ તત્ ।
પુરા બ્રહ્મસભામધ્યે સત્યલોકેઽતિપાવને ॥ ૧॥

જ્ઞાનપ્રસઙ્ગઃ સમભૂત્ સૂક્ષ્માત્સૂક્ષ્મવિમર્શનઃ ।
સનકાદ્યા વસિષ્ઠશ્ચ પુલસ્ત્યઃ પુલહઃ ક્રતુઃ ॥ ૨॥

ભૃગુરત્રિરઙ્ગિરાશ્ચ પ્રચેતા નારદસ્તથા ।
ચ્યવનો વામદેવશ્ચ વિશ્વામિત્રોઽથ ગૌતમઃ ॥ ૩॥

શુક્રઃ પરાશરો વ્યાસઃ કણ્વઃ કાશ્યપ એવ ચ ।
દક્ષઃ સુમન્તુઃ શઙ્ખશ્ચ લિખિતો દેવલોઽપિ ચ ॥ ૪॥

એવમન્યે ઋષિગણા રાજર્ષિપ્રવરા અપિ ।
સર્વે સમુદિતાસ્તત્ર બ્રહ્મસત્રે મહત્તરે ॥ ૫॥

મીમાંસાં ચક્રુરત્યુચ્ચૈઃ સૂક્ષ્માત્સૂક્ષ્મનિરૂપિણીઃ ।
બ્રહ્માણં તત્ર પપ્રચ્છુરૃષયઃ સર્વ એવ તે ॥ ૬॥

ભગવન્ જ્ઞાનિનો લોકે વયં જ્ઞાતપરાવરાઃ ।
તેષાં નો વિવિધા ભાતિ સ્થિતિઃ પ્રકૃતિભેદતઃ ॥ ૭॥

કેચિત્ સદા સમાધિસ્થાઃ કેચિન્મીમાંસને રતાઃ ।
અપરે ભક્તિનિર્મગ્નાશ્ચાન્યે કર્મસમાશ્રયાઃ ॥ ૮॥

વ્યવહારપરાસ્ત્વેકે બહિર્મુખનરા ઇવ ।
તેષુ શ્રેયાન્ હિ કતમ એતન્નો વક્તુમર્હસિ ॥ ૯॥

સ્વસ્વપક્ષં વયં વિદ્મઃ શ્રેયાંસમિતિ વૈ વિધે ।
ઇતિ પૃષ્ટોઽવદદ્ બ્રહ્મા મત્વાઽનાશ્વસ્તમાનસાન્ ॥ ૧૦॥

મુનીન્દ્રા નાહમપ્યેતદ્વેદ્મિ સર્વાત્મના તતઃ ।
જાનીયાદિમમર્થં તુ સર્વજ્ઞઃ પરમેશ્વરઃ ॥ ૧૧॥

તત્ર યામોઽથ સમ્પ્રષ્ટુમિત્યુક્ત્વા તત્ર તૈરયૌ ।
સઙ્ગમ્ય દેવદેવેશં વિષ્ણુનાભિસમાગતમ્ ॥ ૧૨॥

પપ્રચ્છ ઋષિમુખ્યાનાં પ્રશ્નં તં લોકસૃડ્વિધિઃ ।
પ્રશ્નં નિશમ્ય ચ શિવો જ્ઞાત્વા વિધિમનોગતમ્ ॥ ૧૩॥

મત્વાઽનાશ્વસ્તમનસ ઋષીન્ દેવો વ્યચિન્તયત્ ।
કિઞ્ચિદુક્તં મયાઽત્રાપિ વ્યર્થમેવ ભવેન્નનુ ॥ ૧૪॥

સ્વપક્ષત્વેન જાનીયુરૃષયોઽશ્રદ્ધયા યુતાઃ ।
ઇતિ મત્વા પ્રત્યુવાચ દેવદેવો મહેશ્વરઃ ॥ ૧૫॥

શ્રૃણુધ્વં મુનયો નાહમપ્યેતદ્વેદ્મિ સુસ્ફુટમ્ ।
અતો વિદ્યાં ભગવતીં ધ્યાયામઃ પરમેશ્વરીમ્ ॥૧૬॥

તત્પ્રસાદાન્નિગૂઢાર્થમપિ વિદ્મસ્તતઃ પરમ્ ।
ઇત્યુક્તા મુનયઃ સર્વે વિધિવિષ્ણુશિવૈઃ સહ ॥ ૧૭॥

દધ્યુર્વિદ્યાં મહેશાનીં ત્રિપુરાં ચિચ્છરીરિણીમ્ ।
એવં સર્વૈરભિધ્યાતા ત્રિપુઆરા ચિચ્છરીરિણી ॥ ૧૮॥

આવિરાસીચ્ચિદાકાશમયી શબ્દમયી પરા ।
અભવદ્ મેઘગમ્ભીરનિઃસ્વનો ગગનાઙ્ગણે ॥ ૧૯॥

વદન્ત્વૃષિગણાઃ કિં વો ધ્યાતા તદ્દ્રુતમીહિતમ્ ।
મત્પરાણાં હિ કેષાઞ્ચિન્ન હીયેતાભિવાઞ્છિતમ્ ॥ ૨૦॥

ઇતિ શ્રુત્વા પરાં વાણીં પ્રણેમુર્મુનિપુઙ્ગવાઃ ।
બ્રહ્માદયોઽપિ તદનુ તુષ્ટુવુર્વિવિધૈઃ સ્તવૈઃ ॥ ૨૧॥

અથ પ્રોચુરૃષિગણા વિદ્યાં તાં ત્રિપુરેશ્વરીમ્ ।
નમસ્તુભ્યં મહેશાનિ શ્રીવિદ્યે ત્રિપુરેશ્વરિ ॥ ૨૨॥

અશેષોત્પાદયિત્રી ત્વં સ્થાપયિત્રી નિજાત્મનિ ।
વિલાપયિત્રી સર્વસ્ય પરમેશ્વરિ તે નમઃ ॥ ૨૩॥

અનૂતના સર્વદાઽસિ યતો નાસ્તિ જનિસ્તવ ।
નવાત્મિકા સદા ત્વં વૈ યતો નાસ્તિ જરા તવ ॥ ૨૪॥

સર્વાઽસિ સર્વસારાઽસિ સર્વજ્ઞા સર્વહર્ષિણી ।
અસર્વાઽસર્વગાઽસારાઽસર્વજ્ઞાઽસર્વહર્ષિણી ॥ ૨૫॥

દેવિ ભૂયો નમસ્તુભ્યં પુરસ્તાત્ પૃષ્ઠતોઽપિ ચ ।
અધસ્તાદૂર્ધ્વતઃ પાર્શ્વે સર્વતસ્તે નમો નમઃ ॥ ૨૬॥

બ્રૂહિ યત્તેઽપરં રૂપમૈશ્વર્યં જ્ઞાનમેવ ચ ।
ફલં તત્સાધનં મુખ્યં સાધકં સિદ્ધમેવ ચ ॥ ૨૭॥

સિદ્ધેસ્તુ પરમાં કાષ્ઠાં સિદ્ધેષૂત્તમમેવ ચ ।
દેવ્યેતત્ ક્રમતો બ્રૂહિ ભૂયસ્તુભ્યં નમો નમઃ ॥ ૨૮॥

ઇત્યાપૃષ્ટા મહાવિદ્યા પ્રવક્તુમુપચક્રમે ।
દયમાના ઋષિગણે સ્પષ્ટાર્થં પરમં વચઃ ॥ ૨૯॥

શ્રુણુધ્વમૃષયઃ સર્વં પ્રવક્ષ્યામિ ક્રમેણ તત્ ।
અમૃતં હ્યાગમામ્ભોધે સમુદ્ધૃત્ય દદામિ વઃ ॥ ૩૦॥

યત્ર સર્વં જગદિદં દર્પણપ્રતિબિમ્બવત્ ।
ઉત્પન્નં ચ સ્થિતં લીનં સર્વેષાં ભાસતે સદા ॥ ૩૧॥

યદેવ જગદાકારં ભાસતેઽવિદિતાત્મનામ્ ।
યદ્યોગિનાં નિર્વિકલ્પં વિભાત્યાત્મનિ કેવલમ્ ॥ ૩૨॥

ગમ્ભીરસ્તિમિતામ્ભોધિરિવ નિશ્ચલભાસનમ્ ।
યત્ સુભક્તિઐરતિશયપ્રીત્યા કૈતવવર્જનાત્ ॥ ૩૩॥

સ્વભાવસ્ય સ્વરસતો જ્ઞાત્વાપિ સ્વાદ્વયં પદમ્ ।
વિભેદભાવમાહૃત્ય સેવ્યતેઽત્યન્તતત્પરૈઃ ॥ ૩૪॥

અક્ષાન્તઃકરણાદીનાં પ્રાણસૂત્રં યદાન્તરમ્ ।
યદભાને ન કિઞ્ચિત્ સ્યાદ્યચ્છાસ્ત્રૈરભિલક્ષિતમ્ ॥ ૩૫॥

પરા સા પ્રતિભા દેવ્યાઃ પરં રૂપં મમેરિતમ્ ।
બ્રહ્માણ્ડાનામનેકાનાં બહિરૂર્ધ્વે સુધામ્બુધૌ ॥ ૩૬॥

મણિદ્વીપે નીપવને ચિન્તામણિસુમન્દિરે ।
પઞ્ચબ્રહ્મમયે મઞ્ચે રૂપં ત્રૈપુરસુન્દરમ્ ॥ ૩૭॥

અનાદિમિથુનં યત્તદપરાખ્યમૃષીશ્વરાઃ ।

તથા સદાશિવેશાનૌ વિધિવિષ્ણુત્રિલોચનાઃ ॥ ૩૮॥

ગણેશસ્કન્દદિક્પાલાઃ શક્તયો ગણદેવતાઃ ।
યાતુધાનાઃ સુરા નાગા યક્ષકિમ્પુરુષાદયઃ ॥ ૩૯॥

પૂજ્યાઃ સર્વા મમ તનૂરપરાઃ પરિકીર્તિતાઃ ।
મમ માયાવિમૂઢાસ્તુ માં ન જાનન્તિ સર્વતઃ ॥ ૪૦॥

પૂજિતાઽહમેવ સર્વૈર્દદામિ ફલમીહિતમ્ ।
ન મત્તોઽન્યા કાચિદસ્તિ પૂજ્યા વા ફલદાયિની ॥ ૪૧॥

યથા યો માં ભાવયતિ ફલં મત્ પ્રાપ્નુયાત્તથા ।
મમૈશ્વર્યમૃષિગણા અપરિચ્છિન્નમીરિતમ્ ॥ ૪૨॥

અનપેક્ષ્યૈવ યત્કિઞ્ચિદ્ અહમદ્વયીચિન્મયી ।
સ્ફુરામ્યનન્તજગદાકારેણ ઋષિપુઙ્ગવાઃ ॥ ૪૩॥

તથા સ્ફુરન્ત્યપિ સદા નાત્યેમ્યદ્વૈતચિદ્વપુઃ ।
એતન્મે મુખ્યમૈશ્વર્યં દુર્ઘટાર્થવિભાવનમ્ ॥ ૪૪॥

મમૈશ્વર્યં તુ ઋષયઃ પશ્યધ્વં સૂક્ષ્મયા દૃશા ।
સર્વાશ્રયા સર્વગતા ચાપ્યહં કેવલા સ્થિતા ॥ ૪૫॥

સ્વમાયયા સ્વમજ્ઞાત્વા સંસરન્તી ચિરાદહમ્ ।
ભૂયો વિદિત્વા સ્વાત્માનં ગુરોઃ શિષ્યપદં ગતા ॥ ૪૬॥

નિત્યમુક્તા પુનર્મુક્તા ભૂયો ભૂયો ભવામ્યહમ્ ।
નિરુપાદાનસમ્ભારં સૃજામિ જગદીદૃશમ્ ॥ ૪૭॥

ઇત્યાદિ સન્તિ બહુધા મમૈશ્વર્યપરમ્પરાઃ ।
ન તદ્ ગણયિતું શક્યં સહસ્રવદનેન વા ॥ ૪૮॥

શ્રુણ્વન્તુ સઙ્ગ્રહાદ્ વક્ષ્યે મદૈશ્વર્યસ્ય લેશતઃ ।
જગદ્ધાત્રા વિચિત્રેયં સર્વતઃ સમ્પ્રસારિતા ॥ ૪૯॥

મમ જ્ઞાનં બહુવિધં દ્વૈતાદ્વૈતાદિભેદતઃ ।
પરાપરવિભેદાચ્ચ બહુધા ચાપિ તત્ફલમ્ ॥ ૫૦॥

દ્વૈતજ્ઞાનં તુ વિવિધં દ્વિતીયાલમ્બનં યતઃ ।
ધ્યાનમેવ તુ તત્પ્રોક્તં સ્વપ્નરાજ્યાદિસમ્મિતમ્ ॥ ૫૧॥

તચ્ચાપિ સફલં જ્ઞેયં નિયત્યા નિયતં યતઃ ।
અપરં ચાપિ વિવિધં તત્ર મુખ્યં તદેવ હિ ॥ ૫૨॥

પ્રોક્તમુખ્યાપરમયં ધ્યાનં મુખ્ય ફલક્રમમ્ ।
અદ્વૈતવિજ્ઞાનમેવ પરવિજ્ઞાનમીરિતમ્ ॥ ૫૩॥

મામનારાધ્ય પરમાં ચિરં વિદ્યાં તુ શ્રીમતીમ્ ।
કથં પ્રાપ્યેત પરમાં વિદ્યામદ્વૈતસંજ્ઞિકામ્ ॥ ૫૪॥

તદેવાદ્વૈતવિજ્ઞાનં કેવલા યા પરા ચિતિઃ ।
તસ્યાઃ શુદ્ધદશામર્શો દ્વૈતામર્શાભિભાવકઃ ॥ ૫૫॥

ચિત્તં યદા સ્વમાત્માનં કેવલં હ્યભિસમ્પતેત્ ।
તદેવાનુવિભાતં સ્યાદ્ વિજ્ઞાનમૃષિસત્તમાઃ ॥ ૫૬॥

શ્રુતિતો યુક્તિતો વાપિ કેવલાત્મવિભાસનમ્ ।
દેહાદ્યાત્માવભાસસ્ય નાશનં જ્ઞાનમુચ્યતે ॥ ૫૭॥

તદેવ ભવતિ જ્ઞાનં યજ્જ્ઞાનેન તુ કિઞ્ચન ।
ભાસમાનમપિ ક્વાપિ ન વિભાયાત્ કથઞ્ચન ॥ ૫૮॥

તદેવાદ્વૈતવિજ્ઞાનં યદ્વિજ્ઞાનેન કિઞ્ચન ।
અવિજ્ઞાતં નૈવ ભવેત્ કદાચિલ્લેશતોઽપિ ચ ॥ ૫૯॥

સર્વવિજ્ઞાનાત્મરૂપં યદ્વિજ્ઞાનં ભવેત્ ખલુ ।
તદેવાદ્વૈતવિજ્ઞાનં પરમં તાપસોત્તમાઃ ॥ ૬૦॥

જાતે યાદૃશવિજ્ઞાને સંશયાશ્ચિરસમ્ભૃતાઃ ।
વાયુનેવાભ્રજાલાનિ વિલીયન્તે પરં હિ તત્ ॥ ૬૧॥

કામાદિવાસનાઃ સર્વા યસ્મિન્ સન્તિ ન કિઞ્ચન ।
સ્યુર્ભગ્નદંષ્ટ્રાહિરિવ તદ્વિજ્ઞાનં પરં સ્મૃતમ્ ॥ ૬૨॥

વિજ્ઞાનસ્ય ફલં સર્વદુઃખાનાં વિલયો ભવેત્ ।
અત્યન્તાભયસમ્પ્રાપ્તિર્મોક્ષ ઇત્યુચ્યતે ફલમ્ ॥ ૬૩॥

ભયં દ્વિતીયસઙ્કલ્પાદદ્વૈતે વિદિતે દૃઢમ્ ।
કુતઃ સ્યાદ્ દ્વૈતસઙ્કલ્પસ્તમઃ સૂર્યોદયે યથા ॥ ૬૪॥

ઋષયો ન ભયં ક્વાપિ દ્વૈતસઙ્કલ્પવર્જને ।
અતો યત્ફલાન્યત્ સ્યાત્તદ્ભયં સર્વથા ભવેત્ ॥ ૬૫॥

અન્તવત્તુ દ્વિતીયં સ્યાદ્ ભૂયો લોકે સમીક્ષણાત્ ।
સાન્તે ભયં સર્વથૈવાભયં તસ્માત્ કુતો ભવેત્ ॥ ૬૬॥

સંયોગો વિપ્રયોગાન્તઃ સર્વથૈવ વિભાવિતઃ ।
ફલયોગોઽપિ તસ્માદ્ધિ વિનશ્યેદિતિ નિશ્ચયઃ ॥ ૬૭॥

યાવદન્યત્ ફલં પ્રોક્તં ભયં તાવત્પ્રકીર્તિતમ્ ।
તદેવાભયરૂપં તુ ફલં સર્વે પ્રચક્ષતે ॥ ૬૮॥

યદાત્મનોઽનન્યદેવ ફલં મોક્ષઃ પ્રકીર્તિતઃ ।
જ્ઞાતા જ્ઞાનં જ્ઞેયમપિ ફલં ચૈકં યદા ભવેત્ ॥ ૬૯॥

તદા હિ પરમો મોક્ષઃ સર્વભીતિવિવર્જિતઃ ।
જ્ઞાનં વિકલ્પસઙ્કલ્પહાનં મૌઢ્યવિવર્જિતમ્ ॥ ૭૦॥

જ્ઞાતુઃ સ્વચ્છાત્મરૂપં તદાદાવનુપલક્ષિતમ્ ।
ઉપલક્ષક એવાતો ગુરુઃ શાસ્ત્રં ચ નેતરત્ ॥ ૭૧॥

એતદેવ હિ વિજ્ઞેયસ્વરૂપમભિધીયતે ।
જ્ઞાતૃજ્ઞાનજ્ઞેયગતો યાવદ્ ભેદોઽવભાસતે ॥ ૭૨॥

તાવજ્જ્ઞાતા જ્ઞાનમપિ જ્ઞેયં વા ન ભવેત્ ક્વચિત્ ।
યદા ભેદો વિગલિતો જ્ઞાત્રાદીનાં મિથઃ સ્થિતઃ ॥ ૭૩॥

તદા જ્ઞાત્રાદિસમ્પત્તિરેતદેવ ફલં સ્મૃતમ્ ।
જ્ઞાત્રાદિફલપર્યન્તં ન ભેદો વસ્તુતો ભવેત્ ॥ ૭૪॥

વ્યવહારપ્રસિદ્ધ્યર્થં ભેદસ્તત્ર પ્રકલ્પિતઃ ।
અતોઽપૂર્વં લભ્યમત્ર ફલં નાસ્ત્યેવ કિઞ્ચન ॥ ૭૫॥

આત્મૈવ માયયા જ્ઞાતૃજ્ઞાનજ્ઞેયફલાત્મના ।
યાવદ્ભાતિ ભવેત્તાવત્ સંસારો હ્યચલોપમઃ ॥ ૭૬॥

યદા કથઞ્ચિદેતત્તુ ભાયાદ્ ભેદવિવર્જિતમ્ ।
સંસારો વિલયં યાયાચ્છિન્નાભ્રમિવ વાયુના ॥ ૭૭॥

એવંવિધમહામોક્ષે તત્પરત્વં હિ સાધનમ્ ।
તત્પરત્વે તુ સમ્પૂર્ણે નાન્યત્ સાધનમિષ્યતે ॥ ૭૮॥

અપૂર્ણે તત્પરત્વે તુ કિં સહસ્રસુસાધનૈઃ ।

તસ્માત્તાત્પર્યમેવ સ્યાન્મુખ્યં મોક્ષસ્ય સાધનમ્ ॥ ૭૯ ॥

તાત્પર્યં સર્વથૈતત્તુ સાધયામીતિ સંસ્થિતિઃ ।
યસ્તાત્પર્યેણ સંયુક્તઃ સર્વથા મુક્ત એવ સઃ ॥ ૮૦ ॥

દિનૈર્માસૈર્વત્સરૈર્વા મુક્તઃ સ્યાદ્વાઽન્યજન્મનિ ।
બુદ્ધિનૈર્મલ્યભેદેન ચિરશીઘ્રવ્યવસ્થિતિઃ ॥ ૮૧ ॥

બુદ્ધૌ તુ બહવો દોષાઃ સન્તિ સર્વાર્થનાશનાઃ ।
યૈર્જનાઃ સતતં ત્વેવં પચ્યન્તે ઘોરસંસૃતૌ ॥ ૮૨ ॥

તત્રાદ્યઃ સ્યાદનાશ્વાસો દ્વિતીયઃ કામવાસના ।
તૃતીયો જાડ્યતા પ્રોક્તા ત્રિધૈવં દોષસઙ્ગ્રહઃ ॥ ૮૩ ॥

દ્વિવિધઃ સ્યાદનાશ્વાસઃ સંશયશ્ચ વિપર્યયઃ ।
મોક્ષોઽસ્તિ નાસ્તિ વેત્યાદ્યઃ સંશયઃ સમુદાહૃતઃ ॥ ૮૪ ॥

નાસ્ત્યેવ મોક્ષ ઇત્યાદ્યો ભવેદત્ર વિપર્યયઃ ।
એતદ્દ્વયં તુ તાત્પર્યે મુખ્યં સ્યાત્ પ્રતિબન્ધકમ્ ॥ ૮૫ ॥

વિપરીત નિશ્ચયેન નશ્યેદેતદ્ દ્વયં ક્રમાત્ ।
અત્રોપાયો મુખ્યતમો મૂલચ્છેદો ન ચાપરઃ ॥ ૮૬ ॥

અનાશ્વાસસ્ય મૂલં તુ વિરુદ્ધતર્કચિન્તનમ્ ।
તત્પરિત્યજ્ય સત્તર્કાવર્તનસ્ય પ્રસાધને ॥ ૮૭ ॥

વિપરીતો નિશ્ચયઃ સ્યાદ્ મૂલચ્છેદનપૂર્વકઃ ।
તતઃ શ્રદ્ધાસમુદયાદનાશ્વાસઃ પ્રણશ્યતિ ॥ ૮૮ ॥

કામાદિવાસના બુદ્ધેઃ શ્રવણે પ્રતિબન્ધિકા ।
કામાદિવાસનાવિષ્ટા બુદ્ધિર્નૈવ પ્રવર્તતે ॥ ૮૯ ॥

લોકેઽપિ કામી કામ્યસ્ય સદા ધ્યાનૈકતત્પરઃ ।
પુરઃસ્થિતં ન પશ્યેચ્ચ શ્રોત્રોક્તં શ્રુણુયાન્ન ચ ॥ ૯૦ ॥

કામાદિવાસિતસ્યૈવં શ્રુતં ચાશ્રુતસમ્મિતમ્ ।
કામાદિવાસનાં તસ્માજ્જયેદ્ વૈરાગ્યસમ્પદા ॥ ૯૧ ॥

સન્તિ કામક્રોધમુખા વાસનાસ્તુ સહસ્રશઃ ।
તત્ર કામો મૂલભૂતસ્તન્નાશે નહિ કિઞ્ચન ॥ ૯૨ ॥

તતો વૈરાગ્યસંયોગાદ્ નાશયેત્ કામવાસનામ્ ।
આશા હિ કામઃ સમ્પ્રોક્ત એતન્મે સ્યાદિતિ સ્થિતા ॥ ૯૩॥

શક્યેષુ સ્થૂલભૂતા સા સૂક્ષ્માઽશક્યેષુ સંસ્થિતા ।
દૃઢવૈરાગ્યયોગેન સર્વાં તાં,પ્રવિનાશયેત્ ॥ ૯૪॥

તત્ર મૂલં કામ્યદોષપરામર્શઃ પ્રતિક્ષણમ્ ।
વૈમુખ્યં વિષયેભ્યશ્ચ વાસના નાશયેદિતિ ॥ ૯૫॥

યસ્તૃતીયો બુદ્ધિદોષો જાડ્યરૂપો વ્યવસ્થિતઃ ।
અસાધ્યઃ સોઽભ્યાસમુખૈઃ સર્વથા ઋષિસત્તમાઃ ॥ ૯૬॥

યેન તાત્પર્યતશ્ચાપિ શ્રુતં બુદ્ધિમનારુહેત્ ।
તજ્જાડ્યં હિ મહાન્ દોષઃ પુરુષાર્થવિનાશનઃ ॥ ૯૭॥

તત્રાત્મદેવતાસેવામૃતે નાન્યદ્ધિ કારણમ્ ।
સેવાયાસ્તારતમ્યેન જાડ્યં તસ્ય હરામ્યહમ્ ॥ ૯૮॥

જાડ્યાલ્પાનલ્પભાવેન સદ્યો વા પરજન્મનિ ।
ભવેત્તસ્ય ફલપ્રાપ્તિર્જાડ્યસંયુક્તચેતસઃ ॥ ૯૯॥

સર્વસાધનસમ્પત્તિર્મમૈવ પ્રણિધાનતઃ ।
ઉપયાતિ ચ યો ભક્ત્યા સર્વદા મામકૈતવાત્ ॥ ૧૦૦॥

સ સાધનપ્રત્યનીકં વિધૂયાશુ કૃતી ભવેત્ ।
યસ્તુ મામીશ્વરીં સર્વબુદ્ધિપ્રસરકારિણીમ્ ॥ ૧૦૧॥

અનાદૃત્ય સાધનૈકપરઃ સ્યાદ્ મૂઢભાવતઃ ।
પદે પદે વિહન્યેત ફલં પ્રાપ્યેત વા ન વા ॥ ૧૦૨॥

તસ્માત્તુ ઋષયો મુખ્યં તાત્પર્યં સાધનં ભવેત્ ।
એવં તાત્પર્યવાનેવ સાધકઃ પરમઃ સ્મૃતઃ ॥ ૧૦૩॥

તત્ર મદ્ભક્તિયુક્તસ્તુ સાધકઃ સર્વપૂજિતઃ ।
સિદ્ધિરાત્મવ્યવસિતિર્દેહાનાત્મત્વભાવના ॥ ૧૦૪॥

આત્મત્વભાવનં નૂનં શરીરાદિષુ સંસ્થિતમ્ ।
તદભાવનમાત્રં તુ સિદ્ધિર્મૌઢ્યવિવર્જિતમ્ ॥ ૧૦૫॥

આત્મા વ્યવસિતઃ સર્વૈરપિ નો કેવલાત્મના ।
અત એવ તુ સમ્પ્રાપ્તા મહાનર્થપરમ્પરા ॥ ૧૦૬॥

તસ્માત્ કેવલચિન્માત્રં યદ્ દેહાદ્યવભાસકમ્ ।
તન્માત્રાત્મવ્યવસિતિઃ સર્વસંશયનાશિની ॥ ૧૦૭॥

સિદ્ધિરિત્યુચ્યતે પ્રાજ્ઞૈર્નાતઃ સિદ્ધિરનન્તરા ।
સિદ્ધયઃ ખેચરત્વાદ્યા અણિમાદ્યાસ્તથૈવ ચ ॥ ૧૦૮॥

આત્મવિજ્ઞાનસિદ્ધેસ્તુ કલાં નાર્હન્તિ ષોડશીમ્ ।
તાઃ સર્વાસ્તુ પરિચ્છિન્નાઃ સિદ્ધયો દેશકાલતઃ ॥ ૧૦૯॥

ઇયં સ્યાદપરિચ્છિન્નાઃ સ્વાત્મવિદ્યા શિવાત્મિકા ।
સ્વાત્મવિદ્યાસાધનેષુ તાઃ સર્વાઃ સુપ્રતિષ્ઠિતાઃ ॥ ૧૧૦॥

આત્મવિદ્યાવિધાવેતાસ્ત્વન્તરાયપ્રયોજકાઃ ।
કિં તાભિરિન્દ્રજાલાત્મસિદ્ધિતુલ્યાભિરીહિતમ્ ॥ ૧૧૧॥

યસ્ય સાક્ષાદ્ બ્રહ્મપદમપિ સ્યાત્તૃણસમ્મિતમ્ ।
કિયન્ત્યેતાઃ સિદ્ધયો વૈ કાલક્ષપણહેતવઃ ॥ ૧૧૨॥

તસ્માત્ સિદ્ધિર્નેતરા સ્યાદાત્મવિજ્ઞાનસિદ્ધિતઃ ।
યયાઽત્યન્તશોકનાશો ભવેદાનન્દસાન્દ્રતા ॥ ૧૧૩॥

સૈવ સિદ્ધિર્નેતરા તુ મૃત્યુગ્રાસવિમોચિની ।
ઇયમાત્મજ્ઞાનસિદ્ધિર્વિવિધાભ્યાસભેદતઃ ॥ ૧૧૪॥

બુદ્ધિનૈર્મલ્યભેદાચ્ચ પરિપાકવિભેદતઃ ।
સંક્ષેપતસ્તુ ત્રિવિધા ચોત્તમા મધ્યમાઽધમા ॥ ૧૧૫॥

લોકે દ્વિજાનામૃષયઃ પઠિતશ્રુતિસમ્મિતા ।
મેધયા ચ મહાભ્યાસાદ્ વ્યાપારશતસઙ્કુલા ॥ ૧૧૬॥

અપ્યસ્ખલિતવર્ણા યા પઠિતા શ્રુતિરુત્તમા ।
સમાહિતસ્ય વ્યાપારેઽસમાહિતસ્ય ચાન્યદા ॥ ૧૧૭॥

પૂર્વવદ્યાઽપ્યસ્ખલિતા પઠિતા મધ્યમા શ્રુતિઃ ।
યા સદા હ્યનુસન્ધાનયોગાદેવ ભવેત્તથા ॥ ૧૧૮॥

પઠિતા શ્રુતિરત્યન્તાસ્ખલિતા ત્વધમા હિ સા ।
એવમેવાત્મવિજ્ઞાનસિદ્ધિરુક્તા ત્રિધર્ષયઃ ॥ ૧૧૯॥

યા મહાવ્યવહારેષુ પ્રતિસન્ધાનવર્જને ।

અન્યદા તદ્વર્જને વા સર્વદા પ્રતિસન્ધિતઃ ॥ ૧૨૦॥

અન્યૂનાધિકભાવા સ્યાત્સોત્તમા મધ્યમાઽધમા ।
અત્રોત્તમૈવ સંસિદ્ધેઃ પરા કાષ્ઠા નિરૂપિતા ॥ ૧૨૧॥

સ્વપ્નાદિષ્વપ્યવસ્થાસુ યદા સ્યાત્પરમા સ્થિતિઃ ।
વિચારક્ષણતુલ્યેવ સિદ્ધિઃ સા પરમોત્તમા ॥ ૧૨૨॥

સર્વત્ર વ્યવહારેષુ યત્નાત્ સંસ્કારબોધતઃ ।
યદા પ્રવૃત્તિઃ સિદ્ધેઃ સા પરા કાષ્ઠા સમીરિતા ॥ ૧૨૩॥

અયત્નેનૈવ પરમે સ્થિતિઃ સંવેદનાત્મનિ ।
અવ્યાહતા યદા સિદ્ધિસ્તદા કાષ્ઠાં સમાગતા ॥ ૧૨૪॥

વ્યવહારપરો ભાવાન્ પશ્યન્નપિ ન પશ્યતિ ।
દ્વૈતં તદા હિ સા સિદ્ધિઃ પૂર્ણતામભિસઙ્ગતા ॥ ૧૨૫॥

જાગરાદૌ વ્યવહરન્નપિ નિદ્રિતવદ્ યદા ।
સ્થિતિસ્તદા હિ સા સિદ્ધિઃ પૂર્ણતામભિસઙ્ગતા ॥ ૧૨૬॥

એવં સિદ્ધિમનુપ્રાપ્તઃ સિદ્ધેષૂત્તમ ઉચ્યતે ।
વ્યવહારપરો નિત્યં ન સમાધિં વિમુઞ્ચતિ ॥ ૧૨૭॥

કદાચિદપિ મેધાવી સ સિદ્ધેષૂત્તમો મતઃ ।
જ્ઞાનિનાં વિવિધાનાં ચ સ્થિતિં જાનાતિ સર્વદા ॥ ૧૨૮॥

સ્વાનુભૂત્યા સ્વાન્તરેવ સ સિદ્ધેષૂત્તમો મતઃ ।
સંશયો વાપિ કામો વા યસ્ય નાસ્ત્યેવ લેશતઃ ॥ ૧૨૯॥

નિર્ભયો વ્યવહારેષુ સ સિદ્ધેષૂત્તમો મતઃ ।
સર્વં સુખઞ્ચ દુઃખઞ્ચ વ્યવહારઞ્ચ જાગતમ્ ॥ ૧૩૦॥

સ્વાત્મન્યેવાભિજનાતિ સ સિદ્ધેષૂત્તમો મતઃ ।
અત્યન્તં બદ્ધમાત્માનં મુક્તં ચાપિ પ્રપશ્યતિ ॥ ૧૩૧॥

યઃ સ્વાત્મનિ તુ સર્વાત્મા સ સિદ્ધેષૂત્તમો મતઃ ।
યઃ પશ્યન્ બન્ધજાલાનિ સર્વદા સ્વાત્મનિ સ્ફુટમ્ ॥ ૧૩૨॥

મોક્ષં નાપેક્ષતે ક્વાપિ સ સિદ્ધેષૂત્તમો મતઃ ।
સિદ્ધોત્તમોઽહમેવેહ ન ભેદસ્ત્વાવયોઃ ક્વચિત્ ॥ ૧૩૩॥

એતદ્વા ઋષયઃ પ્રોક્તં સુસ્પષ્ટમનુયુક્તયા ।
એતન્મયોક્તં વિજ્ઞાય ન ક્વચિત્ પરિમુહ્યતિ ॥ ૧૩૪॥

ઇત્યુક્ત્વા સા પરા વિદ્યા વિરરામ ભૃગુદ્વહ ।
શ્રુત્વૈતદૃષયઃ સર્વ સન્દેહમપહાય ચ ॥ ૧૩૫॥

નત્વા શિવાદીન્ લોકેશાન્ જગ્મુઃ સ્વં સ્વં નિવેશનમ્ ।
વિદ્યાગીતા મયૈષા તે પ્રોક્તા પાપૌઘનાશિની ॥ ૧૩૬॥

શ્રુતા વિચારિતા સમ્યક્ સ્વાત્મસામ્રાજ્યદાયિની ।
વિદ્યાગીતાઽત્યુત્તમેયં સાક્ષાદ્વિદ્યાનિરૂપિતા ॥ ૧૩૭॥

પઠતાં પ્રત્યહં પ્રીતા જ્ઞાનં દિશતિ સા સ્વયમ્ ।
સંસારતિમિરામ્ભોધૌ મજ્જતાં તરણિર્ભવેત્ ॥ ૧૩૮॥

ઇતિ શ્રીત્રિપુરારહસ્યે જ્ઞાનખણ્ડે
વિદ્યાગીતાનામ વિંશતિતમોઽધ્યાયઃ ॥

Encoded and proofread by Sunder Hattangadi

---

*vidyAgItA*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*